251. राज शब्दस्य मूलधातुः किम् अस्ति? ✓
उ. 'यः राज दीप्तौ'

252. 'राज' शब्दसिद्धिः कस्य प्रत्ययस्य संयोगेनाभवत्?
उ.

253. अष्टाङ्गयोगं कस्मिन् उपनिषदि राजयोग नाम्ना उक्तम्?
उ. त्रिशिखिब्राह्मणोपनिषदि।

254. राजयोगः कैः नामभिः परिभाषितं कृतम्?
उ. आत्मनिष्ठा, राजमुख्यं, अमनस्कयोगः, राजविद्या, ब्रह्मनिष्ठा, महायोगः अध्यात्मयोगः, ज्ञानयोगः, राजाधिराजयोगश्चेत्यादि नामभिः राजयोगः परिभाषितं कृतम्।

255. कर्मयोगः, ध्यानयोगः भक्तियोगश्च कस्य योगस्य अङ्गमस्ति? ✓
उ. राजयोगस्य।

256. मन्त्रयोगः, लययोगः हठयोगस्य च किं फलमस्ति? ✓
उ. राजयोगप्राप्तिः।

257. 'योगी स्वात्मारामेण' हठयोगस्य प्रमुखोद्देश्यं किम् उक्तम्? ✓
उ. "केवलं राजयोगाय हठविद्योपदिश्यते" अर्थात् अहं हठविद्यायाः उपदेशः केवलं राजयोगाय करोमि।

258. योगशिखोपनिषदि राजयोगस्य का परिभाषा उक्तम्?
उ. "रजसो रेतसो योगात् राजयोगऽइति स्मृतः" अर्थात् रजरूपी कुण्डलिनीशक्तेः रेतरूपी शिवेण सह मेलनं राजयोगः इति उक्तम्।

259. महर्षिपतञ्जलिना राजयोगप्राप्त्यर्थं किं मार्गं प्रदर्शितम्? ✓
उ. राजयोगे संयमोपरि बलं दत्तं वर्तते। संयमो नाम - "त्रयमेकत्र संयमः" (पा.यो.सू. 03/04) अर्थात् धारणा, ध्यानं समाधिश्च एतत् त्रयं संयुक्तरूपेण 'संयमः' उच्यते। राजयोगस्य साधनायां साधकस्य कृते धारणा, ध्यानं समाधिश्च एतेषां त्रयाणां सततम् अभ्यासं कुर्यात् इति उक्तम्।

260. राजयोगप्राप्त्यर्थं कति अधिकारीणः (कोटि) उक्तास्सन्ति? ✓
उ. त्रयः। ① उत्तमाधिकारी ② मध्यमाधिकारी ③ अधमाधिकारी।

Scanned with CamScanner

प्र. उत्तमाधिकारी साधकः कया साधनया समाधिं प्राप्तुं शक्नोति?
उ. 'अभ्यासवैराग्याभ्यां'

262. मध्यमाधिकारीसाधकः कया साधनया समाधिं प्राप्तुं शक्नोति?
उ. क्रियायोगेन (तपः, स्वाध्यायम्, ईश्वरप्रणिधानं च)।

263. अधमाधिकारीसाधकः कया साधनया समाधिं प्राप्तुं शक्नोति?
उ. अष्टाङ्गयोगेन (यमः, नियमः, आसनं, प्राणायामः, प्रत्याहारं, धारणा, ध्यानं समाधिश्च)।

264. महर्षिपतञ्जलेरनुसारम् उत्तमाधिकारी साधकाः (उत्तमकोटिसाधकाः) राजयोगस्य प्राप्तिः कथं कर्तुं शक्येत? स्पष्टयत।
उ. येषां साधकानाम् अभ्यासवैराग्याभ्यामेव समाधिः सिद्धिर्जायते ते उत्तमाधिकारीसाधकाः उच्यन्ते। महर्षिपतञ्जलिनाऽपि अष्टांगयोगे चित्तवृत्तीनां निरोधाय/निरुद्धाय मुख्योपायः उक्तः –"
"अभ्यासवैराग्याभ्यां तन्निरोधः" (पा.यो.सू. 01/12) अर्थात् चित्तवृत्तीनां सर्वथा निरोधः अभ्यासवैराग्याभ्याम् एव जायते। अथवा उत्तमाधिकारीसाधकाः केवलम् ईश्वरप्रणिधानेनापि समाधिं प्राप्तुं शक्नुवन्ति एतदर्थम् उक्तं यत् –
"समाधि सिद्धिरीश्वरप्रणिधानात्" (पा.यो.सू. 02/45) अर्थात् ईश्वरप्रणिधानेन समाधिसिद्धिर्भवति। एतत् द्वयं उत्तमकोटिसाधकानां कृते उक्तं। एतादृशानां साधकानां पूर्वजन्मावस्था उत्तमकोट्याः भवति। एतेषां साधकानां कृते योगस्य अन्यान् अङ्गान् ~~पालनी~~ पालनम् अनिवार्यं नास्ति ते सुगमतया समाधिं प्राप्तुं शक्नुवन्ति।

265. महर्षिपतञ्जलेरनुसारं मध्यमकोटि साधकाः कथं राजयोगं प्राप्तुं शक्नुवन्ति?
उ. मध्यमकोटिसाधकाः क्रियायोगेन राजयोगं प्राप्तुं शक्नुवन्ति। महर्षिपतञ्जलिना सूत्रितं यत् – "तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" (पा.यो.सू. 02/01) अर्थात् तपः, स्वाध्यायम् ईश्वरप्रणिधानञ्चैव क्रियायोगः वर्तते। मध्यमकोटिसाधकैः शीतोष्णं, यश-अपयशः, सुख-दुःखं, जय-पराजयश्चेत्यादीन् कष्टान् ~~सहना~~ सोढुम् अभ्यासं करणीयं। मनसि धैर्यं तथा च सर्वासु अवस्थासु चित्तः समानं भवेत् अर्थात् विचलितो न भवेत्। सदैव आध्यात्मिकग्रन्थानाम् अध्ययनं तथा च ईश्वरं प्रति समर्पणभावं स्यात् तदैव समाधिं प्राप्तुं शक्नोति।

266. महर्षिपतञ्जलेरनुसारं निम्नकोटिसाधकाः राजयोगं कथं प्राप्तुं शक्नुवन्ति? स्पष्टयत
उ. अधमकोटिसाधकाः (निम्नकोटिसाधकाः) अर्थात् यैः ~~इदानीमपि~~ एतावता अपि

Scanned with CamScanner

योगसाधना प्रारम्भं न कृतं ; ते अष्टांगयोगस्य साधना अवश्यमेव करणीया।
महर्षिपतञ्जलिना उक्तं यत् -" यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो-ऽष्टावंगानि "(पा.यो.सू. 02/29) अर्थात् यमः, नियमः, आसनं, प्राणायामः, प्रत्याहारं धारणा, ध्यानं समाधिश्च राजयोगस्य अष्टौ अङ्गानि सन्ति। अतोहि अष्टांगयोगं पालनेन अधमकोटिसाधकानां शरीरं, मनश्च सबलं शुद्धं च भविष्यति। तत्परमेव समाधिं प्राप्तुं शक्ष्यन्ति।

267. शास्त्रेषु राजयोगीनां कति अवस्थाः उक्ताःसन्ति?
उ. चत्वारः (4)। (1) प्रथमकल्पितं (2) मधुभूमिकं (3) मधुप्रतीकम् (4) अतिक्रांतभावनीयम्।

268. प्रथमकल्पितं राजयोगीनाम् अवस्थाः समाधिश्च किं भवति? स्पष्टयत।
उ. प्रथमकल्पितयोगीः प्रारम्भिकावस्थायाः साधकः उच्यते यः सवितर्कसमाधेः अभ्यासः करोति।

269. मधुभूमिकराजयोगीनामवस्थाः समाधिश्च किं भवति? स्पष्टयत।
उ. मधुभूमिकराजयोगीनामवस्था प्रथमकल्पितयोगीतः किञ्चित् उत्तमावस्था भवति। मधुभूमिकराजयोगीः निर्वितर्कसमाधेरभ्यासः करोति।

270. मधुप्रतीकराजयोगीनामवस्थाः समाधिश्च किं भवति? वर्णयत।
उ. मधुप्रतीकयोगीः आनन्दानुगतावस्थायां भवति तथा च विचारानुगतसमाधेः अभ्यासः करोति।

271. अतिक्रान्तभावनीय~~योग~~राजयोगीनां किं अवस्था भवति? विस्तरेण वर्णयत।
उ. अतिक्रान्तभावनीययोगी ~~अत्र~~ अस्मितानुगतसमाधिसिद्धः भवति तथा च तस्य ~~ऋतम्भराप्रज्ञा भवति~~ ऋतम्भराप्रज्ञायाः ~~प्राप्ति भवति~~ येन च असम्प्रज्ञातसमाधेः प्राप्तिर्भवति। यदा ऋतम्भराप्रज्ञायाः हेते साधकस्य चित्ते वैराग्योत्पन्नं भवति तदा चित्तस्य कार्यं पूर्णं भवति एवञ्च सः स्वकारणे अर्थात् प्रकृतौ लीनं भवति। तथा च आत्मा एव अवशिष्यते। सः चित्तेन प्रभावितो न भवति एतदेव योगे कैवल्यनाम्ना ज्ञायते। यं मोक्ष अथवा मुक्तिः अपि उच्यते।

272. पातञ्जलयोगसूत्रानुसारम् अष्टांगयोगस्य सूत्रं किमस्ति? लिखत। ✓
उ. "यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावंगानि" (पा.यो.सू. 2/29)

273. अष्टांगयोगस्य प्रथमाङ्गः यमो नाम किम्? ✓
उ. यमः कोऽपि देवः नास्ति अपितु पञ्चव्रतः अस्ति येषां यः पालनं करोति तं ~~अ~~ यमोच्यते। त्रिशिखिब्राह्मणोपनिषदि उक्तं यत् - "यमयन्ति निवर्तयन्ति इति यमाः" अर्थात् यः अस्मान् अवांछनीयकार्येभ्यः रक्षति,

Scanned with CamScanner

मोचयति च। सः यमोच्यते। महर्षिपतञ्जलिना यमं पञ्चसु भागेषु विभक्तम्
"अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः" (पा.यो.सू. 02/30) अर्थात् अहिंसा, सत्यं, अस्तेयः, ब्रह्मचर्यः अपरिग्रहश्च। एतत् यमैः बाह्यानुशासनं वर्तते।

274. अहिंसा शब्दस्य कोऽर्थः? ✓
उ. अ + हिंसा = अहिंसा। अ अर्थात् रहितं/विना; हिंसा अर्थात् मारणं, परपीड़नमित्यादि। अर्थात् अहिंसा नाम परेभ्यः कष्टदानं न करणीयम्, परपीड़नं मास्तु इति।

275. पातञ्जलयोगसूत्रानुसारेण ~~साधकं~~ यदा अहिंसायाः सिद्धिः भवति तदा साधकः किं फलं प्राप्नोति? ✓
उ. "अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः" (पा.यो.सू. 02/35) अर्थात् अहिंसाप्रतिष्ठायाम् अहिंसासिद्धयोगी वैरभावः त्यजति। अहिंसा सिद्धयोगी प्राणीनां प्रति वैरभावं न स्थापयति, स्वभावेन हिंसकप्राणी अपि योगीजनस्य सान्निध्ये वैरभावं त्यजति।

276. योगीयाज्ञवल्क्यानुसारम् अहिंसा किं भवति?
उ. "मनसा वाचा कर्मणा सर्वभूतेषु सर्वदा" (याज्ञवल्क्य संहिता) अर्थात् मनसा वाचा कर्मणा कमपि न पीड़नं, सर्वेभ्यः सुखकामना एव अहिंसा इति उक्तम्।

277. पञ्चमहाव्रतो नाम किम्? ✓
उ. अहिंसा, सत्यम्, अस्तेयं, ब्रह्मचर्यम् अपरिग्रहश्च यमाः एव पञ्चमहाव्रतः ~~भवति~~। अस्ति। पतञ्जलेरनुसारं - "जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम्" अर्थात् एते यमाः जातिः, देशः, कालं तथाच निमित्तसीमारहितं सार्वभौमकारणात् महाव्रतं भवति। ✓

278. पातञ्जलयोगसूत्रानुसारः साधकं यदा सत्यसिद्धिः जायेत तदा किंफलं प्राप्नोति?
उ. "सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्" (पा.यो.सू. 02/36) अर्थात् यदा योगी सत्ये दृढो भवति तदा तस्य वाणी अमोघरूपा भवति। सः यद् वदति तथैवभवति।

279. महाभारते सत्यविषये किमुक्तम्?
उ. महाभारते उक्तं यत् - "न तव वचनं सत्यं, न तव वचनं मृशा।
चद्भूत हितमत्यन्तं तत्सत्यमिति कुच्यते॥"
अर्थात् तव वचनं सत्यं नास्ति मृशा अपि नास्ति अपितु यस्मिन् प्राणीनाम् अधिकं हितं भवति तदेव सत्यं भवति।

280. अस्तेयः शब्दस्य कोऽर्थः? ✓
उ. अचौर्यम् (अचौर्यभावः)।

Scanned with CamScanner

योगीयाज्ञवल्क्यानुसारम् अस्तेयं नाम किम्? ✓

उ. "मनसा वाचा कर्मणा परद्रव्येषु निग्रहः" (याज्ञवल्क्यसंहिता) अर्थात् मनसा वाचा कर्मणा परद्रव्येषु इच्छायाः अभावः एव अस्तेयमुच्यते।

282. पातञ्जलयोगसूत्रानुसारं साधकः अस्तेयप्रतिष्ठायां किं फलं प्राप्नोति? ✓

उ. "अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्" (पा.यो.सू. 02/37) अर्थात् अस्तेयप्रतिष्ठायाम् सर्वरत्नानां प्राप्तिर्भवति।

283. ब्रह्मचर्यः शब्दस्य कोऽर्थः? ✓

उ. ब्रह्मचर्यः अर्थात् वीर्यरक्षणम्। यः जनः स्त्रीसंसर्गेण स्वं रक्षति सः ब्रह्मचारी उच्यते। एवमपि कथ्यते यत् - "परमात्मनि आचरणं, जीवनलक्ष्ये तन्मयस्थितिः, सत्यस्य अन्वेषणं कर्तुं चित्तं बाह्यकारकेभ्यः प्रत्याहृत्य ब्रह्मणि आचरणम्. एतेषु साधनेषु वीर्यपातो न करणमपि अस्ति।

284. पातञ्जलयोगसूत्रानुसारं साधकः ब्रह्मचर्यप्रतिष्ठायां किं फलं प्राप्नोति? ✓

उ. " ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः" (पा.यो.सू. 2/38), यदा ब्रह्मचर्यस्य दृढस्थिति भवति तदा ~~साधकः~~: वीर्यलाभो भवति। व्याख्या→ वीर्य एव सर्वासां शक्तीनां मूलकारणमस्ति। तस्य रक्षणेन शारीरिकं, मानसिकम् आध्यात्मिकञ्च शक्तयः वृद्धि वर्धते तथा च योगमार्गे अवरोधेन विना उन्नति भवितुं शक्नोति।

285. अपरिग्रहः शब्दस्य कोऽर्थः? ✓

उ. संग्रहप्रवृत्तेरभावः, विषयः अभिमानञ्चेत्यादि दोषाणाम् अभावः इति।

286. 'पूर्वजन्मज्ञानं' साधकं कया साधनया भवति? ✓

उ. "अपरिग्रहस्थैर्ये जन्मकथन्तासंबोधः" (पा.यो.सू. 2/39) अर्थात् यदा अपरिग्रहः सिद्धं भवति तदा साधकः ज्ञातुं प्रभवति यत् पूर्वजन्म कथं आसीत् इति।

287. अष्टांगयोगस्य द्वितीयांगः नियमः किं भवति? ✓

उ. "अनुरक्तिः परे तत्वे सततं नियमः स्मृतः" (त्रिशिखिब्राह्मणोपनिषद्) अर्थात् परमतत्व परमात्मनि सततम् अनुरक्तिः एव नियमोच्यते। महर्षिपतञ्जलिना नियमस्य पञ्च अङ्गानि उक्तानि यत् - "शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः" (पा.यो.सू. 02/32) अर्थात् शौचः, संतोषः, तपः, स्वाध्यायम्, ईश्वर-प्रणिधानञ्च इति पञ्चनियमाः। एतद् यमाः आन्तरिकानुशासनं वर्तते।

288. शौचः शब्दस्य कोऽर्थः? ✓

उ. शौचः अर्थात् पवित्रता, स्वच्छता इति।

289. शौचं कतिविधम्? ✓

उ. शौचं द्विविधं → बाह्यम् आन्तरिकं च।

(क) बाह्यशौचः → जलेन मृदया च बाह्यशरीरशुद्धिः इति।

Scanned with CamScanner

(ब) आन्तरिकशौच: → अहङ्कार:, राग:, द्वेषम्, ईर्ष्याभावं, काम, कोपनं भयञ्च इत्यादिन मनोविकारान् दूरीकरणाय आन्तरिकशौच: क्रियते।

२९०. बाह्यशौचसिद्ध्या साधक: किं फलं प्राप्नोति? महर्षिपतञ्जलेरनुसारं स्पष्टयत।

उ. "शौचात्स्वाङ्गजुगुप्सा परैरसंसर्ग:" (पा.यो.सू. २/४०) शौचात् स्वाङ्गेषु घृणाभाव: परेषु संसर्ग: अभावो भवति।

व्याख्या → शौचस्य सतताभ्यासेन साधकस्य हृदय: शुद्धं भवति तथा च साधकं मलमूत्रादि अपवित्रवस्तूनां आवरणं, शरीरस्य अशुद्धय: दृश्यते। ~~तेषु~~ राग: ममत्व भावं त्यजति एतत् कारणादेव परेषु संसर्ग: न भवति। स: शरीरत: एकीभूत्वा केवलीभावाय प्रयतेत। इदं शरीरशुद्धिफलमस्ति।

२९१. आन्तरिकशौचसिद्ध्या साधक: क: फलं प्राप्नोति? महर्षिपतञ्जलेरनुसारं स्पष्टयत।

उ. "सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च" (पा.यो.सू. ०२/४१) अर्थात् चित्तस्य शुद्धि:, मनस: स्वच्छता, एकाग्रता, जितेन्द्रिय: आत्मदर्शनस्य योग्यताया: च आभ्यन्तरशौचेन प्राप्तिर्भवति।

२९२. संतोषसिद्ध्या साधक: किं फलं प्राप्नोति? स्पष्टयत।

उ. "संतोषादनुत्तमसुखलाभ:" (पा.यो.सू. ०२/४२) अर्थात् संतोषेण अनुत्तमं सुखं प्राप्नोति।

२९३. संतोषस्य विषये मनुस्मृतौ किमुक्तम्?

उ. "संतोषमूलं हि सुखं, दुःखमूलं हि विपर्यय:" अर्थात् ~~सं~~ सुखस्य मूलं संतोष: अस्ति; दुःखस्य च मूल असंतोषं वर्तते।

२९४. तपस: सिद्ध्या साधक: क: फलं प्राप्नोति? महर्षिपतञ्जलेरनुसारं स्पष्टयत।

उ. "कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपस:" (पा.यो.सू. ०२/४३) अर्थात् तपसा अशुद्धिक्षयं भवति। ~~अत~~ तथा च शरीरं सर्वासाम् इन्द्रियाणां च सिद्धिर्जायते।

२९५. महर्षिव्यासानुसारं तपो नाम किम्?

उ. "तप: द्वन्द्वसहनम्" अर्थात् य: व्यक्ति: सम-विषम परिस्थितिषु समव्यवहारं आचरति द्वन्द्वान् सहते च। तप: इति उच्यते।

२९६. स्वाध्यायस्य कोऽर्थ:? लिखत।

उ. स्वाध्याय: अर्थात् स्वयंपाठी, स्वविषये ~~अ~~ पठनं, आत्मचिन्तनञ्च इति। गुरुणा ग्रन्थानाम् अध्ययनं, प्रश्नानां समाधानञ्च 'शिक्षा' इति। स्वाध्यायस्य अर्थद्वयं कृतं मत् ~~वं~~ -

(क) स्वयम् अध्ययनं → केनापि सहायेन बिना स्वयम् अध्ययनम् इति। विचार:, चिन्तनं, मननं च ~~स्वअर्थ~~ एभि: उपस्थितानां समस्यानां अवगमनं, समस्या समाधानञ्च इति।

(ii) स्वस्यात्मनोऽध्ययनम् → अर्थात् स्वस्य अध्ययनम् इति। आत्मचिन्तनेन दैवी आसुरी वृत्तीनां दर्शनं तथा च आसुरीवृत्तीनां न्यूनता, दैवीवृत्तीनां च प्रवर्धन मार्गः प्रशस्त करणीयम्। एतद्द्वयं मिलित्वा स्वाध्यायः इति उच्यते।

297. महर्षिपतञ्जलेरनुसारं स्वाध्यायफलं किम् अस्ति? ✔

उ. "स्वाध्यायादिष्टदेवतासम्प्रयोगः" (पा. यो. सू. 02/44) अर्थात् स्वाध्यायात् इष्टदेवतायाः दर्शनं प्राप्तिर्वा भवति। विद्वद्भिः उक्तमपि यत् यदा नवनीतस्य मथनं क्रमिः चेत् घृतं प्राप्यते तथैव स्वाध्यायेन हृदयस्य क्रियते चेत् स्वमनोरथान् पूर्णकरणाय "चिन्तामणेः" प्राप्तिर्भवति।

298. नियमस्य पञ्चमम् अङ्गं किम् अस्ति? तस्यार्थं स्पष्टयत। ✔

उ. ईश्वरप्रणिधानम्। प्रणिधानं नाम धारणम् इति। ईश्वरप्रणिधानम् अर्थात् ईश्वर धारणम् इति। गीतायाम् उक्तं यत् - "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।" अर्थात् हे अर्जुन! ईश्वरः सर्वेषां प्राणीनां हृदये निवासं करोति।

299. पातञ्जलयोगसूत्रानुसारम् ईश्वरप्रणिधान सूत्रं लिखत? ✔

उ. "समाधिसिद्धिरीश्वरप्रणिधानात्" अर्थात् ईश्वरप्रणिधानेन समाधिसिद्धिः भवति इति।

300. भागवत 11/19/35 इत्यस्मिन् यमनियम महिमायाः वर्णनं कथं कृतमस्ति?

उ. "पुंसामुपासितास्तात यथाकामं दुहन्ति च" अर्थात् यः यमनियमस्य पालनं करोति तस्य मनोरथाः सिद्धं भवति। अतः यमनियमस्य महत्ता वर्तते। एतया साधनया योगेन प्राप्ता सिद्धिः सहजतया प्राप्तुं शक्यते।

Scanned with CamScanner